3. परं निधानम्

[ઈસવીસનની અગિયારમી સદીમાં માલવપ્રદેશ (હાલનો મધ્યપ્રદેશ)માં રાજા ભોજ થઈ ગયા. ધારાનગરીમાં રહીને રાજા ભોજે તે સમયે જેવી કીર્તિ પ્રાપ્ત કરી હતી, તેવી આજે પણ છે. એમની સુંદર રાજ્યવ્યવસ્થા, જટિલ પ્રસંગોમાં પણ ન્યાય આપવાની કુશળતા તથા વિદ્વાનોની ગુણવત્તાની પરખ વિશેની કેટલીય રમૂજી કથાઓ આજેય લોકમાં પ્રચલિત છે. આવી કથાઓનો સંસ્કૃતમાં રચાયેલો એક સંગ્રહ भोजप्रबन्धः‌ના નામે જાણીતો છે. આમાં રાજા ભોજને કેન્દ્રમાં રાખીને અનેક ઘટનાઓ વર્ણવવામાં આવી છે, જેમાં કાવ્યાત્મક ચમત્કૃતિઓ ધરાવતાં અનેક પદ્યોનો સમાવેશ થાય છે.

આ ઉપરાંત જુદા-જુદા સમયગાળામાં અનેક સંસ્કૃત કવિઓએ પોતાની વાતને પ્રસ્તુત કરવા માટે રાજા ભોજને પાત્ર તરીકે સ્વીકાર્યા છે. ભોજને લક્ષ્ય બનાવીને રચાયેલી આવી જ એક સંવાદાત્મક કથા અહીં પ્રસ્તુત છે. રાજા ભોજ અને યુવાન પંડિતના આ સંવાદમાં એક કરતાં બીજા પદાર્થની શક્તિમત્તાને ઉપસાવવાનો ઉપક્રમ છે. ક્રમશઃ આગળ વધતો આ સંવાદ છેવટે સંતોષની વાત આવતાની સાથે અટકી જાય છે. આમ આ સંવાદ સંતોષનું મહત્ત્વ આકારી આપે છે.

આ પાઠનો અભ્યાસ કરતી વખતે ક્રિયા અને કર્તૃકારકના સમન્વયની વ્યવસ્થાને સમજવાની છે. વળી, વિવિધ વિભક્તિમાં નામરૂપો કેવો ફેરફાર લે છે અને ક્રિયાપદોનાં રૂપો કેવાં હોય છે, તેનો પણ અહીં અભ્યાસ કરવાનો છે.]

भोजः नाम नृपतिः विद्याप्रियः, कलाप्रियः, प्रजाप्रियश्च आसीत् । अतः तस्य राजसभायां दूरदेशात् अनेके विद्याविशारदाः पण्डिताः समागच्छन्ति स्म ।

एकदा भोजः प्रासादस्य गवाक्षे उपविष्टः आसीत् । सः मार्गे एकं नवागन्तुकम् अनभिज्ञं युवकं पश्यति । तस्य परिचयं ज्ञातुं सः तं प्रासादे आह्वयति । ततस्तयोः मध्ये एवं वार्तालापः संजातः ।



भोजः : भवान् कः वर्तते ?

युवकः : अहं घटपण्डितः अस्मि ।

भोजः : घटपण्डितः ? किं नाम घटपण्डितः इति ?

युवकः : यथा घटे परिपूर्णं जलं तिष्ठति, तथैव मयि परिपूर्ण ज्ञानं वर्तते । अतः अहं स्वात्मानं घटपण्डितं मन्ये ।

भोजः : (युवकस्य गर्वपूर्णाम् उक्तिं श्रुत्वा स्वात्मानं ततोऽप्यधिकं मत्वा अहङ्कारेण सह) यदि त्वं घटः असि, तर्हि अहं मुद्गरत्वेन वर्ते । मुद्गरः स्वकीयेन प्रहारेण घटं विनाशयति । अहमपि घटरूपं भवन्तं विनाशयामि ।

युवकः : यदि भवान् मुद्गरत्वेन वर्तिष्यते, तर्हि अहम् अग्निः भवामि । दहनकर्मा अग्निः भूत्वा मुद्गरं भस्म करिष्यामि ।

भोजः : त्वं यदि वह्नित्वेन वर्तिष्यसे, तर्हि अहं वृष्टिः भविष्यामि । वृष्टेः पुरतः वह्निः स्थातुं न शक्नोति, तथा त्वमपि मम पुरतः स्थातुं न शक्नोषि ।

युवकः : वृष्टिं तु वायुः स्वबलेन यत्र कुत्रापि वाहयितुमर्हति । वृष्टिरूपं भवन्तमहं वायुः भूत्वा इतः ततः वहिष्यामि ।



भोजः : यदि भवान् वातत्वेन वर्तिष्यते, तर्हि अहं वायुभक्षकः भुजगः भविष्यामि । भुजगः सन् सततं वायुरूपं भवन्तं भक्षयिष्यामि ।

युवकः : भवान् यदि सर्पः भविष्यति, तर्हि अहं सर्पभक्षको गरुडो भवामि ।

भोजः : (वाक्केलीं वर्धयन्) त्वं यदि गरुडः असि, तर्हि अहं चक्रधारकः विष्णुः । विष्णुः गरुडारूढः भवति ।

युवकः : (मनसा विष्णुं प्रणम्य च पाण्डित्यं प्रदर्शयन् अग्रे वदति ।) यदि भवान् चक्रधरः विष्णुः, तर्हि अहं भवतः मस्तकस्य उपरि शोभमानं मुकुटं अस्मि । मुकुटं सदा मस्तकस्य उपरि एव संतिष्ठते ।

भोजः : (युवकस्य पाण्डित्यम् अनुभूय) तर्हि मुकुटस्य उपरि शोभमानं पुष्पमहम् । एवमहं अधुना तवोपरि स्थास्यामि ।

युवकः : भवान् यदि पुष्पं भविष्यति, तर्हि अहमपि भ्रमरो भूत्वा तव पुष्पस्योपरि स्थास्यामि ।

भोजः : एवं भवान् द्विरेफः तर्हि अहं सूर्यः । पुष्पस्य अन्तः स्थितः भ्रमरः सूर्यास्तकाले बन्दी भवति, अहमपि त्वां बन्दिनं करिष्यामि ।

युवकः : अहो ! भवान् सूर्यस्तर्हि अहं महाप्रभावी राहुः । राहुस्तु सूर्यं ग्रसते ।

भोजः : (किञ्चित् उच्चैः) भवान् राहुश्चेत् अहं राहुरूपाय तुभ्यं दानं दास्यामि । दानग्रहणेन तवायं गर्वः निश्चयेन शान्तः भविष्यति ।

युवकः : (विहस्य चातुर्येण) यदि भवान् दानी तर्हि अहं सन्तुष्टः । भवतः दानस्य प्रयासः निष्फलः भविष्यति । सर्वतः अलुब्धः अहं भवतः दानं न ग्रहीष्यामि ।

एवमुत्तरोत्तरं विवादरतयोः भोजयुवकयोः मध्ये यदा सन्तोषस्य विषयः समुपस्थितः तदा 'समागते संतोषे सर्वं शान्तं भवति' इति वचनानुसारं विवादोऽपि स्वयमेव शान्तः ।

अन्ते चतुरं ज्ञानेन गुणेन च उपेतं तं पण्डितं युवकं प्रणम्य धाराधिपतिः भोजराजः अवदत् ''अयि घटपण्डित ! गुणपूजके धारादेशे भवतः स्वागतमस्ति । भवान् विजयी जातः । सन्तुष्टं जनं न कोऽपि पराजेतुमर्हति । यतो हि सन्तोष एव पुरुषस्य परं निधानं वर्तते ।''

ટિપ્પણી

નામ (પુંલ્લિંગ) : नृपतिः રાજા **प्रासादः** મહેલ **गवाक्षः** ઝરૂખો **मुद्गरः** મુદ્ગર, લાકડાનું ધોકા જેવું વજનમાં ભારે સાધન (વ્યાયામ કરવા માટેનું એક સાધન) **वह्निः** અગ્નિ **वायुभक्षकः** વાયુને ખાનારો **वातः** પવન **भुजगः** સાપ **द्विरेफः** ભમરો

(સ્ત્રીલિંગ) : वृष्टिः વરસાદ **वाक्केली** વાણીની રમત, વાણીનો ખેલ

સર્વનામ : तस्य તેના (પું.) **सः** તે (પું.) **अनेके** અનેક, ઘણા બધા **तम्** તેને (પું.) **तयोः** તે બન્નેનો (પું.) **भवान्** આપ, તમે **मयि** મારામાં **मम** મારું **भवन्तम्** આપને, તમને **तव** તમારું **तुभ्यम्** તમારા માટે, તમને **भवतः** આપનું, તમારું

વિશેષણ : विशारद ચતુર, કુશળ, જાણકાર **कोविद** અનુભવી, કુશળ **धुरंधर** ધુરાને ધારણ કરનાર, અગ્રણી, મુખ્ય **अनभिज्ञ** અજાણ્યું અપરિચિત **शोभमान** શોભતું

અવ્યય : एकदा એકવાર **उपरि** ઉપરની બાજુએ **अतः** એટલા માટે **ततः** તેથી **यदि** જો **तर्हि** તો **पुरतः** સામે **यत्र** જ્યાં, જે સ્થળે **कुत्रापि** ક્યાંય પણ **इतः** આ બાજુથી **ततः** તે બાજુથી **सदा** હંમેશાં **अधुना** અત્યારે **मध्ये** વચ્ચે **अयि** સંબોધન કરવા માટે વપરાતો શબ્દ, હે **यतो हि** કેમકે

સમાસ : राजसभायाम् (राज्ञः सभा – राजसभा, तस्याम् । षष्ठी तत्पुरुष) । विद्याविशारदः (विद्यासु विशारदः – विद्याविशारदः । सप्तमी तत्पुरुष) । वार्तालापः (वार्तायाः आलापः । षष्ठी तत्पुरुष) भोजयुवपण्डितयोः (भोजः च युवपण्डितः च – भोजयुवपण्डितौ, तयोः । इतरेतर द्वन्द्व) । गर्वपूर्णाम् (गर्वेण पूर्णा – गर्वपूर्णा, ताम् । तृतीया तत्पुरुष) वायुभक्षकः (वायोः भक्षकः । षष्ठी तत्पुरुष) गरुडारूढः (गरुडम् आरूढः । द्वितीया तत्पुरुष) सूर्यास्तकाले (सूर्यस्य अस्तकालः – सूर्यास्तकालः, तस्मिन् । षष्ठी तत्पुरुष) दानग्रहणेन (दानस्य ग्रहणम् – दानग्रहणम्, तेन । षष्ठी तत्पुरुष) भोजयुवकयोः (भोजः च युवकः च भोजयुवकौ, तयोः । इतरेतर द्वन्द्वः) । धाराधिपतिः । (धारायाः अधिपतिः । षष्ठी तत्पुरुष)

ક્રિયાપદ : પ્રથમ ગણ (પરસ્મૈપદ) **सम् + आ + गम् > गच्छ्** (**समागच्छति**) આવવું **आ + ह्वे > ह्वय्** (**आह्वयति**) બોલાવવું **अर्ह्** (**अर्हति**) હોઈ શકવું, યોગ્ય હોવું **वह्** (**वहति**) વહન કરવું, લઈ જવું (આત્મનેપદ) **सम् + स्था > तिष्ठ्** (**संतिष्ठते**) ઊભા રહેવું **वृत्** (**वर्तते**) હોવું **ग्रस्** (**ग्रसते**) ગળી જવું, કોળિયો કરી જવો.

વિશેષ

(1) શબ્દાર્થ : विद्याविशारदाः વિદ્યાઓમાં કુશળ **उपविष्टः** બેઠેલો **नवागन्तुकम्** નવા આવનારને **निम्नानुसारम्** નીચે મુજબ **घटपण्डितः** ઘડાની જેમ ભરેલો વિદ્વાન, પૂર્ણ જ્ઞાની **परिपूर्णम्** પૂરી રીતે ભરેલો **गर्वपूर्णाम् उक्तिम्** ગર્વથી ભરેલી ઉક્તિને-વચનને **मुद्गरत्वेन** મુદ્ગર તરીકે **प्रहारेण** ઘા વડે, પ્રહારથી **वर्तिष्यते** વર્તશો, વર્તણૂક કરશો **दहनकर्मा** બાળવાના કર્મવાળો, બાળનાર **वाहयितुमर्हति** વહાવી શકે છે. ઉડાવી શકે છે. **वृष्टिरूपम्** વૃષ્ટિરૂપી **इतः ततः** આમ તેમ **वहिष्यामि** વહી જઈશ. ઉડાવી જઈશ. **पाण्डित्यं प्रदर्शयन्** પંડિતપણાનું પ્રદર્શન કરતો **शोभमानम्** શોભતાને, શોભી રહેલાને **अनुभूय** અનુભવીને **स्थास्यामि** ઊભો રહીશ. **ग्रहीष्यामि** ગ્રહણ કરીશ. સ્વીકારીશ. **बन्दी** કેદી, કેદ કરાયેલો **महाप्रभावी** મહાન્ પ્રભાવવાળો **निश्चयेन** નિશ્ચિતરૂપે, ચોક્કસ **विहस्य** હસીને **चातुर्येण** ચાલાકીથી, હોશિયારીથી **अलुब्धः** લોભ વગરનો, નિર્લોભી **एवमुत्तरोत्तरम्** આ રીતે ઉત્તરોત્તર, આમ આગળ ને આગળ **विवादरतयोः** વિવાદમાં રત, વિવાદમાં લાગેલા **वचनानुसारम्** વચન પ્રમાણે, વચનને અનુસરીને **अन्ते** છેલ્લે, છેવટે **उपेतम्** યુક્ત, સાથેના **गुणपूजके** ગુણનું પૂજન કરનાર એવા **धारादेशे** ધારા દેશમાં **विजयी जातः** વિજેતા થયો. જીત્યો. **पराजेतुमर्हति** હરાવી શકે છે.

(2) संधि : प्रजाप्रियश्च (प्रजाप्रियः च) । ततस्तयोः (ततः तयोः) । तथैव (तथा एव) । ततोऽप्यधिकम् (ततः अपि अधिकम्) । कुत्रापि (कुत्र अपि) । तवोपरि (तव उपरि) । भ्रमरो भूत्वा (भ्रमरः भूत्वा) । सूर्यस्तर्हि (सूर्यः तर्हि) ।

स्वाध्याय

1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।

(1) अहं घटपण्डितः ..... ।

(क) स्मः (ख) अस्मि (ग) अस्ति (घ) सन्ति

(2) 'वायुः' इति शब्दस्य पर्यायशब्दः कः ?

(क) वाक् (ख) वा (ग) वातः (घ) वह्निः

(3) 'गवाक्षः' शब्दस्य अर्थः कः ?

(क) शिખર (ख) છત (ग) દરબાર (घ) ઝરૂખો

(4) भूपालः मार्गे सुवर्णखण्डम् ..... ।

(क) अक्षिपन् (ख) अक्षिपः (ग) अक्षिपत् (घ) अक्षिपम्

(5) संसारे कीदृशं जनं पराजेतुं कोऽपि न अर्हति ?

(क) धनिकम् (ख) सन्तुष्टम् (ग) वाचालम् (घ) बलिष्ठम्

(6) अहं दानं ..... ।

(क) करिष्यति (ख) करिष्यामि (ग) करिष्यसि (घ) करिष्यन्ति

(7) कस्य शिखरे मुकुटं सदा तिष्ठति ?

(क) मस्तके (ख) मस्तकस्य (ग) मस्तकं (घ) मस्तकात्

2. संस्कृत भाषया उत्तरं लिखत ।

(1) अग्निः कं भस्म करोति ?

(2) राहुः केन शान्तः भवति ?

(3) सन्तोष एव कस्य परं निधानम् ?

(4) भ्रमरः कुत्र बन्दी भवति ।

3. उदाहरणानुसारं शब्दरूपाणां परिचयं लिखत ।

	शब्दरूपम्	मूलशब्दः	अन्तः	लिङ्गम्	विभक्तिः	वचनम्
उदाहरणम् –	जनाः	जन	अकारान्तः	पुल्लिंगम्	प्रथमा	बहुवचनम्
(1)	प्रासादस्य	.....	.....	.....	.....	.....
(2)	गवाक्षे	.....	.....	.....	.....	.....

(3) वृष्टेः ....

(4) पण्डितम् ....

(5) विवादरतयोः ....

4. वचनानुसारं धातुरूपैः रिक्तस्थानानि पूरयत ।

उदा. वर्तते वर्तेते वर्तन्ते ।

(1) ..... तिष्ठतः ..... ।

(2) अर्हति .... ।

(3) ग्रहीष्यामि .... ।

(4) ..... भविष्यतः ..... ।

5. शीर्षकानुरूपं धातुरूपाणां परिचयं लिखत ।

	धातुरूपम्	धातुः	कालः/लकारः	पदम्	पुरुषः	वचनम्
उदा.	सेवन्ते	सेव्	वर्तमान	आत्मनेपद	अन्य	बहुवचनम्
(1)	अपश्यत्	.....	.....	.....	.....	.....
(2)	तिष्ठति	.....	.....	.....	.....	.....
(3)	भविष्यति	.....	.....	.....	.....	.....
(4)	स्थास्यामि	.....	.....	.....	.....	.....

6. कोष्ठकेषु प्रदत्तानि पदानि प्रयुज्य संस्कृतवाक्यानि रचयत ।

(1) રાજા યુવકને જુએ છે. (नृप, युवक, दृश्-पश्य्)

(2) લોકો સભામાં જાય છે. (जन, सभा, गम्-गच्छ्)

(3) ધારાદેશમાં ગુણોની પૂજા થાય છે. (धारादेश, गुण, पूजा, भू)

(4) ભોજ પ્રજામાં પ્રિય હતો. (भोज, प्रजा, प्रिय, भू)

(5) અગ્નિ મુદ્ગરને બાળે છે. (वह्नि, मुद्गर, दह्)

7. मातृभाषायाम् उत्तरत ।

(1) રાજા ભોજ કેવા હતા ?

(2) યુવક પોતાને ઘટપંડિત શા માટે માને છે ?

(3) રાજા ભોજ અને યુવકનો વિવાદ ક્યારે અટકી જાય છે ? શા માટે ?

(4) ધારાદેશની શી વિશેષતા હતી ?

પ્રવૃત્તિઓ

- **परं निधानम्** ગદ્યપાઠનું કથાવસ્તુ સંક્ષેપમાં લખો.
- ભોજપ્રબંધમાં આવતી એક કોઈ કથા વર્ગમાં રજૂ કરો.